# स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः

[पूर्वाङ्कात् अनुवर्तते...]

अनुवादकौ– डॉ. राकेशदाशः*, शान्तनुनायेकः†

## प्रथमः खण्डः— तृतीयोऽध्यायः (कामारपुकुरे धर्मसंसारः)

### क्षुदिरामस्य भगिन्याः श्रीमत्याः रामशीलायाः कथा

पूर्वमेव वयम् उल्लिखितवन्तः यत् श्रीयुक्तक्षुदिरामस्य रामशीलाख्या एका भगिनी, निधिरामः कानाइरामः अथवा रामकानाइः इत्याख्यौ द्वौ भ्रातरौ आस्ताम्। देरेपुरस्य भूस्वामिना सह कलहवशात् यदा सः निःस्वः अभूत् तदा तस्य भगिन्याः वयः प्रायः पञ्चत्रिंशत् वर्षाणि, भ्रातृद्वयस्य च त्रिंशत् पञ्चविंशतिः वर्षाणि च इति भवेत्। तदा ते सर्वेऽपि विवाहं कृत्वा संसारं प्राविशन्। कामारपुकुरतः प्रायः षट्-क्रोश-पश्चिमे स्थिते छिलिमपुरे स्वर्गीयेण भागवत-वन्द्योपाध्यायेन सह श्रीमत्याः रामशीलायाः विवाहः अभूत्, ततश्च रामचन्द्रनामधेयः एकः पुत्रः हेमाङ्गिनीनाम्नी एका कन्या च जज्ञाते। तस्मिन् विपत्काले रामचन्द्रस्य वयः प्रायः एकविंशतिः वर्षाणि, हेमाङ्गिन्याः च षोडश वर्षाणि आसीत्। तदा श्रीयुक्तरामचन्द्रः मेदिनीपुरे व्यवहारवृत्तिम् आरब्धवान्। श्रीमतीहेमाङ्गिन्याः जन्म देरेपुरस्थे मातुलालये एव अभूत्, अपि च भ्रातृभ्योऽपि

---

* सहायकाध्यापकः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोध-संस्थानस्य, बेलुडमठस्य।

† शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

सा मातुलानां स्नेहम् अधिकम् अलभत। श्रीयुक्तक्षुदिरामः तां दुहितृवत् पालयित्वा विवाहकाले च उपस्थिते सति कामारपुकुरतः वायव्यां दिशि प्रायः सार्धद्विक्रोशे स्थिते शिहडाख्यग्रामस्य श्रीयुक्तकृष्णचन्द्रमुखोपाध्यायाय तां स्वयं सम्प्रादात्। यौवनकाले च सम्प्राप्ते सा क्रमशः राघवः, रामरत्नः, हृदयरामः, राजारामः इति नामकानां चतुर्णां पुत्राणां जननी अभूत्।

## क्षुदिरामस्य भ्रातृद्वयस्य कथा

श्रीयुक्तक्षुदिरामस्य निधिरामाख्यस्य भ्रातुः काचन सन्ततिः आसीद् न वेति अस्माभिः न ज्ञायते; किन्तु कनिष्ठतमस्य कानाइरामस्य रामतारकः अथवा हलधारी, कालिदासश्च इति द्वौ पुत्रौ अजनिषाताम्। कानाइरामः भक्तिमान् भावुकश्च आसीत्। एकदा सः कुत्रापि नाट्यं श्रोतुं गतवान् आसीत्। तदा तत्र श्रीरामचन्द्रस्य वनगमनाभिनयः प्रवर्तते स्म। तत् शृण्वन् सः तथा तन्मयः अभवत् यत् कैकेय्याः श्रीरामचन्द्रं वनं प्रेषयितुम् मन्त्रणचेष्टादिकम् अवगम्य कैकेयीरूपाम् अभिनेत्रीं प्रहर्तुम् उद्यतोऽभूत्। यद्वा भवतु, पैतृकसम्पत्तेः लोपाद् अनन्तरं निधिरामः कानाइरामश्च देरेपुरं परित्यज्य प्रायः येषु ग्रामेषु तेषां श्वशुरालयाः आसन्, तेषु ग्रामेषु आश्रयं स्वीकृतवन्तः।

## क्षुदिरामस्य भागिनेयः रामचाँदः

श्रीमत्याः रामशीलायाः पुत्रस्य श्रीयुक्तरामचाँदवन्द्योपाध्यायस्य मेदिनीपुरे व्यवहारवृत्तेः कथां वयं पूर्वमेव उल्लिखितवन्तः। व्यवसायवशात् सः मेदिनीपुरे निवसन् किञ्चिद् धनम् अर्जयति स्म। तदा मातुलानां दुरवस्थां स्मृत्वा एषः श्रीयुक्तक्षुदिरामाय प्रतिमासं पञ्चदश रूप्यकाणि, निधिरामाय कानाइरामाय च प्रत्येकं प्रतिमासं दश रूप्यकाणि प्रदाय तयोः साहाय्यं कुर्वन् आसीत्। श्रीयुक्तक्षुदिरामः किञ्चित्कालं यावत् भागिनेयस्य वार्तां न प्राप्नोति चेदेव चिन्तितो भूत्वा मेदिनीपुरं गच्छति स्म, द्वे वा चत्वारि वा दिनानि तस्य गृहे निवासं कृत्वा कामारपुकुरं प्रत्यागच्छति स्म। एकस्मिन्नवसरे तथा मेदिनीपुरागमनकाले

तस्य विषये विशिष्टामेकां घटनां वयं श्रुतवन्तः। सा घटना श्रीयुक्तक्षुदिरामस्य आन्तरिकदेवभक्तेः परिचायिका इति हेतोः वयम् अत्र तस्य उल्लेखं कृतवन्तः।

## क्षुदिरामस्य देवभक्तेः परिचायिका घटना

कामारपुकुरतः नैर्ऋत्यां दिशि प्रायः चत्वारिंशत्-माइल-दूरे मेदिनीपुरम्। रामचाँदस्य तदात्मीयानां च कुशलवार्तां बहूनि दिनानि यावद् अप्राप्य चिन्तामग्नः श्रीयुक्तक्षुदिरामः एकदा तत्स्थानं गन्तुं गृहात् निष्क्रान्तः। तदा माघमासः फाल्गुनमासो वा भवेत्। बिल्ववृक्षाणां सर्वाणि पत्राणि एतस्मिन् काले पतन्ति, अपि च यावद् नूतनपत्रोद्भवो न भवति, तावद् जनानां शिवपूजायां बहु कष्टं भवति। श्रीयुक्तक्षुदिरामः तत्कष्टं केभ्यश्चिद् दिवसेभ्यः पूर्वतः एव विशेषरूपेण अनुभूतवान् आसीत्।

सः प्रत्यूषे निर्गत्य प्रायः दशवादनपर्यन्तम् अनवरतं मार्गे चलित्वा कञ्चन ग्रामं प्राप्तवान्, तत्र च नवीनपत्राभरणेन भूषितानां सर्वेषां बिल्ववृक्षाणां दर्शनेन तस्य मनः उल्लसितम् अभूत्। तदा मेदिनीपुरगमनस्य विषयम् पूर्णतया विस्मृत्य सः ग्रामतः एकां नूतनां कण्डोलिकाम्, एकां गात्रमार्जनीं च क्रीत्वा समीपस्थायाः पुष्करिण्याः जले सम्यक् प्रक्षालितवान्। अनन्तरं नवीनबिल्वपत्रैः कण्डोलिकां पूरयित्वा, आर्द्रया गात्रमार्जन्या तानि पत्राणि आच्छाद्य, अपराह्णे प्रायः त्रिवादने कामारपुकुरम् आजगाम। गृहं प्राप्यैव श्रीयुक्तक्षुदिरामः स्नानं सम्पाद्य सानन्दं तैः सर्वैः बिल्वपत्रैः महादेवं शीतलामातरं च बहुकालपर्यन्तम् अपूपुजत्; अनन्तरं स्वयम् आहारार्थम् उपविष्टवान्। तदा श्रीमतीचन्द्रादेवी अवकाशं प्राप्य तं मेदिनीपुरं प्रति अगमनस्य कारणं पृष्टवती, आद्योपान्तं सर्वं श्रुत्वा च बिल्वपत्रैः देवाराधनस्य लोभेन एतावन्तं मार्गं अतिक्रमितवान् इति ज्ञात्वा सा नितरां विस्मिता अभूत्। परेद्यवि प्रातःकाले श्रीयुक्तक्षुदिरामः पुनः मेदिनीपुरं प्रति निर्गतः।